শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীগুরুপৱনপুরাধীশায শ্রীকৃষ্ণায পরব্রহ্মণে নমঃ

শ্রী মেল্পত্তূর্ নারাযণভট্টতিরেঃ কৃতিষু

# ॥ শ্রীমন্নারাযণীযে পঞ্চত্রিংশং দশকম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥শ্রীমন্নারাযণীযে পঞ্চত্রিংশং দশকম্॥

## শ্রীরামচরিতৱর্ণনম্

নীতস্সুগ্রীৱমৈত্রীং তদনু হনুমতা দুন্দুভেঃ কাযমুচ্চৈঃ
ক্ষিপ্ত্বাঙ্গুষ্ঠেন ভূযো লুলুৱিথ যুগপৎ পত্রিণা সপ্ত সালান্।
হৎৱা সুগ্রীৱঘাতোদ্যতমতুলবলং বালিনং ৱ্যাজৱৃত্ত্যা
ৱর্ষাৱেলামনৈষীর্ৱিরহতরলিতস্ত্বং মতঙ্গাশ্রমান্তে॥ **35.1** ॥

সুগ্রীৱেণানুজোক্ত্যা সভযমভিযতা
ৱ্যূহিতাং ৱাহিনীং তা -
মৃক্ষাণাং ৱীক্ষ্য দিক্ষু দ্রুতমথ দযিতা -
মার্গণাযাৱনম্রাম্।
সন্দেশং চাঙ্গুলীযং পৱনসুতকরে
প্রাদিশো মোদশালী
মার্গে মার্গে মমার্গে কপিভিরপি তদা
ৎৱৎপ্রিযা সপ্রযাসৈঃ॥ **35.2** ॥

ৎৱদ্বার্তাকর্ণনোদ্যদ্গরুদুরুজৱস -
স্পাতিসম্পাতিৱাক্য -
প্রোত্তীর্ণার্ণোধিরন্তর্নগরি জনকজাং
ৱীক্ষ্য দৎৱাহঙ্গুলীযম্।
প্রক্ষুদ্যোদ্যানমক্ষক্ষপণচণরণঃ
সোঢবন্ধো দশাস্যং
দৃষ্টৱা প্লুষ্টৱা চ লঙ্কাং ঝটিতি স হনুমান্
মৌলিরত্নং দদৌ তে॥ **35.3** ॥

ৎৱং সুগ্রীৱাঙ্গদাদিপ্রবল কপিচমূচক্রৱিক্রান্তভূমি -
    চক্রোঽভিক্রম্য পারেজলধি নিশিচরেন্দ্রানুজাশ্রীযমাণঃ।
তৎপ্রোক্তাং শত্রুৱার্তাং রহসি নিশমযন্ প্রার্থনাপার্থ্যরোষ -
    প্রাস্তাগ্নেযাস্ত্রতেজস্ত্রসদুদধিগিরা লব্ধৱান্ মধ্যমার্গম্॥ **35.4** ॥

কীশৈরাশান্তরোপাহৃত গিরিনিকরৈঃ সেতুমাধাপ্য যাতো
    যাতূন্যামর্দ্য দংষ্ট্রানখশিখরিশিলাসালশস্ত্রৈঃ স্বসৈন্যৈঃ।
ৱ্যাকুর্ৱন্ সানুজস্ত্বং সমরভুৱি পরং ৱিক্রমং শক্রজেত্রা
    ৱেগান্নাগাস্ত্রবদ্ধঃ পতগপতিগরুন্মারুতৈর্মোচিতোঽভূঃ॥ **35.5** ॥

সৌমিত্রিস্ত্বত্র শক্তিপ্রহৃতিগলদসুর্ৱাতজানীতশৈল -
    ঘ্রাণাৎ প্রাণানুপেতো ৱ্যকৃণুত কুসৃতিশ্লাঘিনং মেঘনাদম্।
মাযাক্ষোভেষু ৱৈভীষণৱচনহৃতস্তম্ভনঃ কুম্ভকর্ণং
    সম্প্রাপ্তং কম্পিতোর্ৱীতলমখিলচমূভক্ষিণং ৱ্যক্ষিণোস্ত্বম্॥ **35.6** ॥

গৃহ্ণন্ জম্ভারিসম্প্রেষিতরথকৱচৌ রাৱণেনাভিযুদ্ধ্যন্
    ব্রহ্মাস্ত্রেণাস্য ভিন্দন্ গলততিমবলামগ্নিশুদ্ধাং প্রগৃহ্ণন্।
দেৱশ্রেণীৱরোজ্জীৱিতসমরমৃতৈরক্ষতৈরৃক্ষসঙ্ঘৈ -
    র্লঙ্কাভর্ত্রা চ সাকং নিজনগরমগাঃ সপ্রিযঃ পুষ্পকেণ॥ **35.7** ॥

প্রীতো দিৱ্যাভিষেকৈরযুতসমধিকান্ ৱৎসরান্ পর্যরংসী -
    র্মৈথিল্যাং পাপৱাচা শিৱ ! শিৱ ! কিল তাং গর্ভিণীমভ্যহাসীঃ।
শত্রুঘ্নেনার্দযিৎৱা লৱণনিশিচরং প্রার্দযঃ শূদ্রপাশং
    তাৱদ্বাল্মীকিগেহে কৃতৱসতিরুপাসূত সীতা সুতৌ তে॥ **35.8** ॥

ৱাল্মীকেস্ত্বৎসুতোদ্গাপিতমধুরকৃতেরাজ্ঞযা যজ্ঞৱাটে
    সীতাং ৎৱয্যাপ্তুকামে ক্ষিতিমৱিশদসৌ ৎৱং চ কালার্থিতোঽভূঃ।
হেতোঃ সৌমিত্রিঘাতী স্বযমথ সরযূমগ্ননিশ্শেষভৃত্যৈঃ
    সাকং নাকং প্রযাতো নিজপদমগমো দেৱ ৱৈকুণ্ঠমাদ্যম্॥ **35.9** ॥

সোঽযং মর্ত্যাৱতারস্তৱ খলু নিযতং মর্ত্যশিক্ষার্থমেৱং
ৱিশ্লেষার্তির্নিরাগস্ত্যজনমপি ভৱেৎ কামধর্মাতিসক্ত্যা।
নো চেৎ স্বাত্মানুভূতেঃ ক্ক নু তৱ মনসো ৱিক্রিযা চক্রপাণে
স ৎৱং সত্ত্বৈকমূর্তে পৱনপুরপতে ৱ্যাধুনু ৱ্যাধিতাপান্॥ **35.10** ॥

॥ ইতি শ্রীমন্নারাযণীযে পঞ্চত্রিংশং দশকং সমাপ্তম্ ॥